श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ अडैक्कलप्पत्तु ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ अडैक्कलप्पत्तु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

भक्त्यादावनवाप्तसुस्थितिरटन् सर्वत्र धावन् यथा
श्रान्तस्सन् पतितो रघूत्तमपदे काकस्तथा सप्तसु।
मुक्तिप्राप्तिकरीषु पूर्षु महिते काञ्चीपुरे दीव्यतः
हस्तीशस्य कृपैकलक्ष्यमधुना भूत्वा तमाशिश्रिये॥ 1॥

कपर्दिचतुराननप्रभृतयः स्वकर्मानुगाः
भवन्ति चलवैभवा इति विलोक्य पद्माजुषः।
गजाचलमहेशितुः प्रथितकाञ्चिपूर्वासिनः
दयाब्धिवरदप्रभोः शरणमेमि पादद्वयम्॥ 2॥

तन्त्रैरन्यैर्विना स्वस्वसरणिमविनाश्यैव मन्त्रैस्तथोक्तैः
वैलक्षण्यं च सूक्तैः सुविशदमवलोक्यैव पादौ नमन्ति।
कारुण्योद्वर्षिणोऽस्मास्वखिलतनुयुतेष्वस्य देवाधिनेतुः
हस्तिक्षोणीधराधीश्वरवरदविभोः शीलतोऽन्यन्न जाने॥ 3॥

काकक्रव्यादपाण्ड्वात्मजनृपरमणीक्षत्रबन्धुद्विपेन्द्र -
स्थाणुब्रह्मादिबृन्दारकपुरनिलयेभ्यस्सुखेष्वग्र्यभाजम्।
मोक्षं चानन्दपूर्णं ददतमिह दयां प्रेक्ष्य पूर्णां तदीयां
नागागाधीशदेवाधिपवरदपदाम्भोजयुग्मं प्रपद्ये॥ 4॥

श्रीशोल्लासक्रिया या विदधदतिमुदा सञ्जिहानोऽनभीष्टाः
सम्बन्धौघं गुणौघं समधिकमनुभूयैव विश्वासकाष्ठाम्।
श्रेष्ठां संप्रार्थ्य रक्षां जगति गतिधुतो नैव चक्रे तपोऽहं
काञ्च्यां सालावृतायां वरदमुरुदयं रक्षितारं प्रपद्ये॥ 5॥

प्राज्ञा ये शरणं गता अनुययुर्ये वा तदुक्त्या दृढं
ये वैतादृशतारकोक्तिदकृपामेवैत्य चेरुस्तपः।
चौर्यस्याकरणात् स्वका इम इति प्रीत्याङ्ग्यकुर्वंश्च ये
तेषां गोप्तरि मां दयालुवरदे न्यस्ये तुलस्यद्वहे॥ 6॥

भवत्पदयुगं श्रये त्विति सकृत्प्रवक्तृनलं
प्रतीत इति बोधयन्निव करं प्रदर्श्याभयम्।
वितीर्य सकलं स्वकं स्वयमतीव यो राजते
दयालुवरदप्रभोः पदयुगं च तस्याश्रये॥ 7॥

विश्वासान्यूनतायै उपचितफलपूर्त्यै च दुष्कर्मलब्धां
सत्यांशाविस्मृतिं तां निरसयितुमवाप्तोपलब्धौ प्रतुष्ट्यै।
शैतल्याहीनतायै विधरणकरणार्थं प्रशान्त्यै दयाळोः
सौन्दर्योपासिमूर्तेः करिगिरिकमितुः किं गिरो विस्मरामि॥ 8॥

क्षणे च निगमार्थवित्सुमनसां विशुद्धोक्तिभिः
शुभारविधियां च तास्सुकलयन् गुरूणां गिरः।
विनाश्य धिषणासिना विशयमात्मनः प्राणमं
रवीन्दुनयनस्य तत्पदयुगं गजाद्रीशितुः॥ 9॥

लक्ष्म्यां दिव्याकृतौ तन्निरवधिकरुणानिर्मलज्ञानयोश्च
संसाध्ये स्वानुबन्धे त्वमितजनपदैश्वर्यपूर्णे प्रणाशे।
रक्षायां सर्गकार्येऽप्यनुदितकलुषाकाररीत्या स्थितस्य
सुस्थे लक्ष्ये विलग्नश्शर इव वरदस्यानुकम्पावतोऽहम्॥ 10॥

उपायोऽन्यो न स्यात् फलमपि रमेशादिति विदां
प्रपत्तिस्सर्वेषां फलमपि तदीयं सकृदिमे।
कदाचिद्वोपायः फलमिति च मत्वैव पदयोः
कृपाळोः प्रोक्तं सद्गुणिदशकमेतद्धिकलुषम्॥ **11**॥

श्रीदेशिकप्रबन्धस्थप्रपत्तिदशकस्य हि।
गोपालार्यो लिलेखार्थतात्पर्ये श्लोकसंयुते॥ **12**॥

॥ इति अडैक्कलप्पत्तु प्रबन्धः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥